
## समास के नियम

# समसनं समासः




| | | |
|---|---|---|
| अव्ययीभावः | पूर्वपदप्रधानः अव्ययीभावः | अधिहरिः |
| तत्पुरुषः | उत्तरपदप्रधानः तत्पुरुषः | राजपुरुषः |
| बहुब्रीहिः | अन्यपदप्रधानः बहुब्रीहिः | पीताम्बरः |
| द्वन्द्वः | उभयपदप्रधानः द्वन्द्वः | रामकृष्णौ |
| कर्मधारयः | उपमानोपमेयः कर्मधारयः | घनश्यामः |
| द्विगुः | संख्यापूर्वः द्विगुः | पञ्चपात्रम् |
| नञः | निषिध्यार्थबोधकः नञः | असमर्थः |
| मध्यपदलोपी | मध्यपदस्य लोपः | शाकपार्थिवः |

# अव्ययीभावः -

पूर्वपदप्रधानोऽव्ययीभावः। अर्थात् अव्ययीभावसमासे पदद्वयं भवति। प्रथमं पदमव्ययं तथा उत्तरपदं सुबन्तं भवति। समासे सति पदद्वयमपि अव्ययं भवति।

| क्र. | अव्ययम् | अर्थः | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|---|
| 1 | अधि | विभक्त्यर्थे | हरौ इति | अधिहरि |
| 2 | उप | समीपे | गंगायाः समीपम् | उपगंगम् |
| 3 | सु | समृद्धौ | मद्रानां समृद्धिः | सुमद्रम् |
| 4 | दुर् | व्यृद्ध्यर्थे | यवनानां व्यृद्धिः | दुर्यवनम् |
| 5 | निर् | अभावे | विघ्नानामभावः | निर्विघ्नम् |
| 6 | अति | अत्यये | बाधायाः अत्ययः | अतिबाधम् |
| 7 | अति | असम्प्रति | क्रोधः सम्प्रति न युज्यते | अतिक्रोधम् |
| 8 | इति | शब्दप्रादुर्भावे | हरेः प्रादुर्भावः | इतिहरि |
| 9 | अनु | पश्चात् | गृहस्य पश्चात् | अनुगृहम् |
| 10 | अनु | योग्ये | रूपस्य योग्यम् | अनुरूपम् |
| 11 | प्रति | वीप्सायाम् | गृहं गृहं प्रति | प्रतिगृहम् |
| 12 | यथा | अनतिवृत्तौ | ज्ञानमनतिक्रम्य | यथाज्ञानम् |
| 13 | अनु | आनुपूर्व्ये | ज्येष्ठस्यानुपूर्व्येण | अनुज्येष्ठम् |
| 14 | स | यौगपद्ये | चक्रेण युगपत् | सचक्रम् |
| 15 | स | सादृश्ये | हरेः सदृशः | सहरि |
| 16 | स | सम्पत्तौ | क्षत्राणां सम्पत्तिः | सक्षत्रम् |
| 17 | स | साकल्ये | तृणमपि अपरित्यज्य | सतृणम् |
| 18 | स | अन्ते | अग्निग्रन्थपर्यन्तम् | साग्नि |

# कर्मधारयः -

**तत्पुरुषस्य भेदः कर्मधारयः । कर्मधारयस्य भेदः द्विगुः ।**

**कर्मधारयसमासे पदद्वयं भवति, परम् उभयोः पदयोः लिङ्गं, वचनं, विभक्तिश्च समाना भवति । अत्र विशेष्य-विशेषणयोर्मध्ये, उपमान-उपमोययोर्मध्ये च समासः भवति । कर्मधारयः अपि सप्तविधः भवति।**

| क्र. | प्रकारः | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| 1 | विशेषणपूर्वपदम् | नीलम् उत्पलम्<br>पीतम् अम्बरम् | नीलोत्पलम्<br>पीताम्बरम् |
| 2 | विशेष्यपूर्वपदम् | वैयाकरणानां खसूचिः | वैयाकरणखसूचिः<br>मयूरव्यंसकः |
| 3 | विशेषणोभयपदम् | पूर्वं स्नातः पश्चात् अनुलिप्तः | स्नातानुलिप्तः<br>पीतप्रतिबद्धः |
| 4 | उपमानपूर्वपदम् | घन इव श्यामः<br>कर्पूर इव गौरः | घनश्यामः<br>कर्पूरगौरः |
| 5 | उपमानोत्तरपदम् | पुरुषः व्याघ्र इव<br>कर इव किसलयः | पुरुषव्याघ्रः<br>करकिसलयः |
| 6 | सम्भावना पूर्वपदम् | गुण इव बुद्धिः<br>आलोक इव शब्दः | गुणबुद्धिः<br>आलोकशब्दः |
| 7 | अवधारणपूर्वपदम् | विद्या एव धनम्<br>क्षमा एव शस्त्रम् | विद्याधनम्<br>क्षमाशस्त्रम् |

# तत्पुरुषः-

यस्मिन् समासे उत्तरपदं प्रधानं भवति सः तत्पुरुषसमासः ।

अत्र पदद्वयं भवति। प्रथमं पदं विविधासु विभक्तिषु भवति तथा अपरं पदं द्वतीयातः सप्तमीं पर्यन्तं भवति। अर्थात् अत्र द्वितीयान्तमारभ्य सप्तम्यल्तं यावत् पूर्वपदैः सह सुबन्तः समस्यते।

## द्वितीयातत्पुरुषः

श्रितः, अतीतः, पतितः, गतः, अत्यस्तः, प्राप्तः, आपन्नः इत्यादिभिः सह द्वितीयान्तं पूर्वपदं समस्यते।

| विग्रहवाक्यम् | समस्तं पदम् |
|---|---|
| कष्टं श्रितः | कष्टश्रितः |
| कालम् अतीतः | कालातीतः |
| कूपं पतितः | कूपपतितः |
| ग्रामं गतः | ग्रामगतः |
| संकटम् अत्यस्तः | संकटात्यस्तः |
| सुखं प्राप्तः | सुखप्राप्तः |
| दुखम् आपन्नः | दुखापन्नः |

# तृतीयातत्पुरुषः

तृतीयान्त- अर्थ-कृत्-गुणवचनेन अर्थशब्देन, हीन-छिन्न-भिन्न-रहित-शून्य-युक्त-रचित-कृत्-दग्ध-हृत-विद्ध-दंष्ट्र-आवृत-प्रणीत्- आच्छन्न-सदृश-सम-पूरव-कलह-मिश्रित-सहितादिभिश्च तृतीयान्तं पूर्वपदं समस्यते। अर्थादत्रापि पदद्वयं भवति, पूर्वपदं तृतीयान्तं भवति परमुत्तरपदं प्रधानं भवति।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| शंकुलया | शकुलाखण्डः | धान्येन अर्थः | धान्यार्थः |
| धनेन हीनः | धनहीनः | शस्त्रेण छिन्नः | शस्त्रच्छिन्नः |
| नखैः भिन्नः | नखभिन्नः | बुद्ध्या रहितः | बुद्धिरहितः |
| ज्ञानेन शून्यः | ज्ञानशून्यः | चन्दनेन युक्तः | चन्दनयुक्तः |
| पाणिनिना प्रणीतम् | पाणिनिप्रणीतम् | कालिदासेन कृतम् | कालिदासकृतम् |
| अग्निना दग्धम् | अग्निदग्धम् | चौरैः हृतम् | चौरहृतम् |
| शरेण विद्धः | शरविद्धः | सर्पेण दंष्टः | सर्पदंष्टः |
| वस्त्रेण आवृतः | वस्त्रावृतः | व्यासेन रचितम् | व्यासरचितम् |
| मेघेन आच्छन्नः | मेघाच्छन्नः | मात्रा सदृशी | मातृसदृशी |
| क्रोधेन समः | क्रोधसमः | मासेन पूर्वः | मासपूर्वः |
| वाचा कलहः | वाक्कलहः | जलेन मिश्रितः | जलमिश्रितः |
| भार्यया सदृशः | भार्यासदृशः | | |

# चतुर्थीतत्पुरुषः

**तादर्थ्यार्थे बलि-हित-सुख-रक्षितादिसुबन्तपदैः सह चतुर्थन्तपदस्य समासः चतुर्थीतत्पुरुषसमासः भवति।**

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| यूपाय दारुः | यूपदारुः | द्विजाय अर्थम् | द्विजार्थम् |
| काकाय बलिः | काकबलिः | गोभ्यः रक्षितम् | गोरक्षितम् |
| राष्ट्राय हितम् | राष्ट्रहितम् | पित्रे सुखम् | पितृसुखम् |

# पञ्चमीतत्पुरुषः

**पञ्चमी भयेन। अर्थात् भयादिसुबन्तपदैः सह पञ्चम्यन्तपदस्य समसनं पञ्चमीतत्पुरुषसमासः भवति।**

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| चौराद् भयम् | चौरभयम् | रोगाद् मुक्तः | रोगमुक्तः |
| ग्रामाद् आगतः | ग्रामागतः | सुखाद् अपेतः | सुखापेतः |
| वृक्षात् पतितः | वृक्षपतितः | राज्यात् भ्रष्टः | राज्यभ्रष्टः |
| धर्मात् च्युतः | धर्मच्युतः | गृहात् निर्गतः | गृहनिर्गतः |

# षष्ठीतत्पुरुषः

स्वस्वामिभावादिवाचकेन षष्ठ्यन्तपदेन सह सुबन्तपदं समस्यते। अर्थात् अत्र समर्थः पदविधिः इति नियमेन सुबन्तेन सह षष्ठ्यन्तपदस्य समासः भवति।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| राज्ञः पुरुषः | राजपुरुषः | गंगायाः जलम् | गंगाजलम् |
| ब्राह्मणस्य पुत्रः | ब्राह्मणपुत्रः | गवां शाला | गोशाला |
| सर्वेषाम् उदयः | सर्वोदयः | देशस्य रक्षा | देशरक्षा |

# सप्तमीतत्पुरुषः

सप्तमी शौण्डैः। अर्थात् शौण्ड-धूर्त-कितव-प्रवीण-संवीत-पटु-पण्डित-कुशल-निपुण-सिद्ध-शुष्कपक्वादिभि:सुबन्तैः सह सप्तम्यन्तं पदं समस्यते यत्र तत् सप्तमीतत्पुरुषः।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| दाने शौण्डः | दानशौण्डः | क्रियायां धूर्तः | क्रियाधूर्तः |
| द्यूते कितवः | द्यूतकितवः | धर्मे प्रवीणः | धर्मप्रवीणः |
| रणे संवीतः | रणसंवीतः | व्यवहारे पटुः | व्यवहारपटुः |
| शास्त्रे पण्डितः | शास्त्रपण्डितः | कार्ये कुशलः | कार्यकुशलः |
| धर्मे कुशलः | धर्मकुशलः | योगे सिद्धः | योगसिद्ध |
| आतपे शुष्कः | आतपशुष्कः | स्थाल्यां पक्वः | स्थालीपक्वः |

# नञ् समासः

तत्पुरुष का भेद नञ् समास है। जब निषेधार्थ बोध के लिए न, अन, अ पद का प्रयोग होता है तो वहां नञ् समास होता है। इसमें पूर्ववर्ण यदि व्यञ्जन होता है तो अ तथा स्वर हो तो अन का प्रयोग होता है। कदाचित् न का भी प्रयोग होता है।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| न शान्तिः | अशान्तिः | न समर्थः | असमर्थः |
| न शक्तम् | अशक्तम् | न लौकिकम् | अलौकिकम् |
| न आगतः | अनागतः | न आदिः | अनादिः |
| न अन्तः | अनन्तः | न ईश्वरः | अनीश्वरः |
| न आकृतिः | अनाकृतिः | न एकधा | अनेकधा |

## मध्यमपदलोपी समासः

यह भी तत्पुरुष समास का भेद ही है। इसमें जिन पदों में समास होता है उनके मध्य का सम्बन्धबोधक शब्द का लोप हो जाता है। जैसे-

देवपूजकः ब्राह्मणः-देवब्राह्मणः, शाकप्रियः पार्थिवः- शाकपार्थिवः

## प्रादिसमासः

कर्मधारय समास में जब प्रादि उपसर्गों का समास होता है तब उसे प्रादि समास कहते हैं। जैसे-

प्रकृष्टः आचार्यः- प्राचार्यः, अतिक्रान्तः रथम्-अतिरथः।

# द्विगुसमासः

कर्मधारय समास में जब प्रथम पद संख्यावाचक हो तो द्विगु समास होता है। इसी लिए कहते हैं कि संख्यापूर्वो द्विगुः।

| विग्रहवाक्यम् | समस्तं पदम् |
|---|---|
| त्रयाणां पात्राणां समाहारः | त्रिपात्रम् |
| षण्णां मुखानां समाहारः | षण्मुखम् |
| अष्टानां पदानां समाहारः | अष्टपदम् |
| सप्तानां नक्षत्राणां समाहारः | सप्तनक्षत्रम् |
| नवानां ग्रहानां समाहारः | नवग्रहः |
| शतानाम् अब्दानां समाहारः | शताब्दी |
| चतुर्णां युगानां समाहारः | चतुर्युगम् |
| त्रयाणां लोकानां समाहारः | त्रिलोकी |
| पञ्चानां वटानां समाहारः | पञ्चवटी |
| त्रयाणां भुवनानां समाहारः | त्रिभुवनम् |
| पञ्चानां पात्राणां समाहारः | पञ्चपात्रम् |

अकारान्तोत्तरपदो द्विगुः, (स्त्रियां)यथा-

| | |
|---|---|
| सप्तानां शतानां समाहारः | सप्तशती |

संज्ञार्थे तु यथावत् प्रयुज्यते। इति सिद्धान्तः।

यथा- सप्तर्षयः

# बहुव्रीहिसमासः

अन्यपदप्रधानः बहुव्रीहिः। अर्थात् जहां समस्त होने के बाद भिन्न अर्थ प्रधान होता है वहां बहुव्रीहि समास होता है। जैसे पीताम्बर में पीतम्- पीला, अम्बरम्- वस्त्र ये दोनो अर्थ गौण हो जाता है तथा तीसरा अर्थ पीताम्बरः - हरिः मुख्य हो जाता है। प्रायः प्रथमान्त पदों में बहुव्रीहि समास होता है।

| विग्रहवाक्यम् | समस्तं पदम् |
|---|---|
| चत्वारः भुजा यस्य सः | चतुर्भुजः,विष्णुः |
| तपः धनं यस्य सः | तपोधनः,तपस्वी |
| दश आननानि यस्य सः | दशाननः,रावणः |
| अन्वर्थं नाम यस्याः | अन्वर्थनामा |
| महान् आत्मा येषां | महात्माः |
| गजस्य इव आननं यस्य सः | गजाननः |
| त्रीणि लोचनानि यस्य सः | त्रिलोचनः |
| त्रीणि नयनानि यस्य सः | त्रिनयनम् |
| नीलः कण्ठः यस्य सः | नीलकण्ठः |
| श्वेतानि अम्बराणि यस्य सः | श्वेताम्बरः |

# बहुव्रीहिविशेषः

कभी कभी बहुव्रीहि समास में प्रथमान्त के साथ षष्ठ्यन्त या सप्तम्यन्त पद का भी समास होता है ।

| | |
|---|---|
| चन्द्रः मौलौ यस्य सः-चन्द्रमौली | वज्रं पाणौ यस्य सः-वज्रपाणिः |
| कण्ठे कालः यस्य सः-कण्ठकालः | चक्रं पाणौ यस्य सः- चक्रपाणिः |
| शूलं पाणौ यस्य सः-शूलपाणिः | चन्द्रः शेखरे यस्य सः-चन्द्रशेखरः |

चन्द्रस्य कान्तिः इव कान्तिः यस्य सः-चन्द्रकान्तिः

मृगस्य नयने इव नयने यस्याः सा -मृगनयनी

चन्द्रः इव आननं यस्याः सा - चन्द्रानना

बहुव्रीहि समास में यत् सर्वनाम शब्द का प्रयोग सभी विभक्तियों में प्रायः होता है ।जैसे-

| | |
|---|---|
| प्राप्तम् उदकं यं सः-<br>प्राप्तोदकः | जीतानि इन्द्रियाणि येन सः-<br>जीतेन्द्रियः |
| उपहृतः पशुः यस्मै सः-उपहृतपशुः | महान्तौ बाहू यस्य सः-महाबाहुः |
| दश वदनानि यस्य सः-<br>दशवदनः | कमलं आसनं यस्याः सा -<br>कमलासना । |

# बहुव्रीहिविशेषः

प्रायः तृतीयान्त पदों में सह के योग में भी बहुव्रीहि समास होता है।

| | |
|---|---|
| राज्ञा सह वर्तमानः-सराजः | जनकेन सह वर्तमानः-सजनकः |
| पुत्रेण सह वर्तमानः-सपुत्रः | भार्यया सह वर्तमानः-सभार्यः |
| बहुव्रीहि समास प्रायःउपसर्ग मे भी होता है ।जैसे- | |
| निर्गताः जनाः यस्मात् तत्-निर्जनम् | सुन्दरी वधूः यस्य सः-सुन्द्रवधूकः |
| अविद्यमानः पुत्रः यस्य सः-अपुत्रः | बहवः दण्डिनः यस्मिन्-<br>बहुदण्डिकः |

## द्वन्द्वसमासः

समुच्चयार्थक -च अव्यय से युक्त पदों में द्वन्द्वसमास होता है। ये चार प्रकार का होता है।

| | |
|---|---|
| समुच्चयार्थक | ईश्वरं गुरुञ्च मन्त्रस्व |
| अन्वाचयार्थक | भिक्षामट गामानय |
| इतरेतरयोग | धवखदिरौ छिन्धि |
| समाहारः | रामश्च लक्ष्मणश्च रामलक्ष्मणौ |

# द्वन्द्वसमास- उदाहरण

| | |
|---|---|
| रामश्च लक्ष्मणश्च भरतश्च इति | रामलक्ष्मणभरताः |
| कृष्णश्च अर्जुनश्च | कृष्णार्जुनौ |
| धर्मः च अर्थश्च कामश्च | धर्मार्थकामाः |
| आहारश्च निद्रा च भयञ्च | आहारनिद्राभयम् |
| वाक् च त्वक् च | वाक्त्वचम् |
| अजश्च अजा च | अजौ |
| माता च पिता च | पितरौ |
| ब्राह्मणी च ब्राह्मणश्च | ब्राह्मणौ |
| फलञ्च फलञ्च फलञ्च फलञ्च | फलानि |

**इसमें प्रायः इकारान्त शब्द तथा उकारान्त शब्द पहले होता है।**

| | |
|---|---|
| हरिश्च हरश्च | हरिहरौ |
| हरिश्च हरश्च गुरुश्च | हरिगुरुहराः |